# पञ्चमः पाठः 5

## Lesson – 5

## यक्षप्रश्नः

अयं पाठ्यभागः महाभारते वनपर्वणि अस्ति । महाभारतं तु व्यासेन विरचितम्। पाण्डवाः अज्ञातवासकाले द्वैतवने निवसिताः । तदा युधिष्ठिरयक्षयोः संवादः प्रश्नोत्तररूपेण वर्णितः अस्ति। अत्र यक्षेण पृष्टाः प्रश्नाः युधिष्ठिरेण उत्तरिताः। ततः कानिचन प्रश्नोत्तराणि अत्र प्रदत्तानि विद्यन्ते।

यक्षः -

इन्द्रियार्थाननुभवन् बुद्धिमान् लोकपूजितः ।
संमतः सर्वभूतानां उच्छवसन् को न जीवति ।। 1

युधिष्ठिरः -

देवतातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानां उच्छवसन्न स जीवति ।। 2



यक्षः -

कोऽतिथिः सर्वभूतानां
किंस्विद्धर्मं सनातनम् ।
अमृतं किंस्विद्राजेन्द्र
किंस्वित् सर्वमिदं जगत् ।। 3



Unit 5.indd 33 06-06-2018 12:40:17

युधिष्ठिरः -

अतिथिः सर्वभूतानामग्निः सोमो गवामृतम् ।
सनातनोऽमृतो धर्मो वायुः सर्वमिदं जगत् ।। 4

यक्षः -

कश्च धर्मः परो लोके कश्च धर्मः सदाफलः ।
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते ।। 5

युधिष्ठिरः -

आनृशंस्यं परो धर्मः त्रयीधर्मः सदाफलः ।
मनो यस्य न शोचन्ति सन्धिः सद्भिर्न जीर्यते ।। 6

यक्षः -

प्रियवचनवादी किं लभते
विमृशितकार्यकरः किं लभते ।
बहुमित्रकरः किं लभते
धर्मे रतः किं लभते कथय ।। 7

युधिष्ठिरः -

प्रियवचनवादी प्रियो भवति
विमृशितकार्यकरोऽधिकं जयति।
बहुमित्रकरः सुखं वसते
यश्च धर्मरतः स गतिं लभते ।। 8



Unit 5.indd 34 06-06-2018 12:40:17

## अभ्यासः

### I. अधो दत्तानाम् शब्दानाम् अर्थं लिखत-

1. बुद्धिमान् – inteligent
2. इन्द्रियम् – sense organ
3. अतिथिः – guest
4. भृत्यः – attender
5. जगत् – world
6. अग्निः – fire
7. सोमः – moon
8. वायुः – wind

### II. अधो विद्यमानानां पदानां व्याकरणरूपं लिखत-

1. जीवति – लट् – प्रथमपुरुषः, एकवचनम् of जीव् to live
2. निपतति – लट् – प्रथमपुरुषः, एकवचनम् of पत् with नि to fall
3. शोचन्ति – लट् – प्रथमपुरुषः, बहुवचनम् of शुच् to think
4. लभते – लट् – आत्मनेपदी, प्रथमपुरुषः, एकवचनम् of लभ् to attain
5. जयति – लट् – प्रथमपुरुषः, एकवचनम् of जय् to win
6. भवति – लट् – प्रथमपुरुषः, एकवचनम् of भव् to be

### III. अधो लिखितानां पदानां विग्रहं लिखत-

1. बुद्धिमान् - ______________________
2. अतिथिः - ______________________
3. राजेन्द्रः - ______________________
4. सर्वभूतानाम् - ______________________
5. गवामृतम् - ______________________
6. कार्यकरः - ______________________
7. धर्मरतः - ______________________



Unit 5.indd 35 06-06-2018 12:40:17

## IV. यथोचितं सन्धिम् अथवा विच्छेदं कुरुत -

1. आत्मनश्च – आत्मनः + च
2. कोऽतिथिः – कः + अतिथिः
3. सर्वमिदम् – सर्वम् + इदं
4. कश्च – कः + च
5. सद्भिर्न – सद्भिः + न
6. सन्धिर्न – सन्धिः + न
7. कार्यकरोऽधिकम् – कार्यकरः+ अधिकम्
8. यश्च – यः + च

## V. अधः प्रदत्तानां शब्दानां समानार्थकं पदं लिखत-

1. बुद्धिमान् – धीमान्
2. भृत्यः – सेवकः
3. जगत् – विश्वम्
4. अग्निः – वह्निः
5. सोमः – इन्दुः, चन्द्रः
6. वायुः – अनिलः, मरुत्, पवनः
7. आनृशंस्यम् – दया, कृपा
8. मित्रम् – सुहृत्

## VI. अधो निर्दिष्टानां पदानां विपरीतपदानि लिखत-

1. धर्मः × अधर्मः
2. सद्भिः × असद्भिः
3. बहु × अल्पम्
4. बुद्धिमान् × मूढः
5. सुखम् x दुःखम्
6. प्रियम् x अप्रियम्
7. जीवनम् x मरणम्
8. अमृतम् x विषम्

## VII. अधो लिखितानां प्रश्नानाम् उत्तरं दीयताम्-

1. यक्षप्रश्नः इति पाठ्यांशः कुतः स्वीकृतः ?
2. कः न जीवति ?
3. सर्वभूतानाम् अतिथिः कः ?
4. परलोके कः धर्मः ?
5. कः धर्मः सदाफलः ?
6. कैः सन्धिः न जीर्यते ?

7. प्रियवचनवादी किं लभते ?

8. धर्मे रतः किं लभते ?

## VIII. विस्तरेण उत्तरत-

1. यक्ष-युधिष्ठिरयोः संवादं यथाग्रन्थं लिखत।

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

यक्षप्रश्नवत् श्रीआदिशङ्करभगवत्पादैः विरचितायां प्रश्नोत्तररत्नमालिकायां अपि प्रश्नोत्तररूपेण संवादः वर्णितः अस्ति। अत्र श्रीभगवत्पादाः शिष्योक्तानां प्रश्नानां समीचीनानि उत्तराणि ददति । अत्र कानिचन उदाह्रियन्ते-

भगवन् किं उपादेयं? गुरुवचनं, हेयमपि च किम् ? अकार्यम् ।

कः गुरुः? अधिगततत्वः शिष्यहिताय उद्यतः सततम्।।

कः पथ्यतरः? धर्मः, कः शुचिरिह? यस्य मानसं शुद्धम् ।

कः पण्डितः? विवेकी, किं विषं? अवधीरणा गुरुषु ।।

कः अन्धः? यः अकार्यरतः, कः बधिरः? यो हितानि न श्रुणोति।

कः मूकः? यो काले हितानि वक्तुं न जानाति ।।

### Weblinks :

1. https://hi.in.wikipedia.org/wiki/यक्षप्रश्न
2. https://sa.in.wikipedia.org/wiki/महाभारतम्